

## पञ्चदशः पाठः

# मत्स्यत्रयकथा




वेलाग्रामस्य कस्मिंश्चित् जलाशये अनागतविधाता प्रत्युत्पन्नमतिः यद्भविष्यश्चेति नामकाः त्रयः मत्स्याः अवसन्। कदाचित् तं जलाशयम् अवलोक्य धीवराः परस्परमवदन्, ''अस्मिन् जलाशये बहवः मत्स्याः सन्ति, प्रभाते अस्माभिः अत्र अवश्यमेव आगन्तव्यम् इति।'' एतादृशं निश्चयं कृत्वा ते अगच्छन्। एतत् श्रुत्वा तेषु मत्स्येषु अनागतविधाता नाम मत्स्यः अकथयत्, ''श्वः प्रभाते ते धीवराः नूनमेव अत्र आगमिष्यन्ति, सर्वान् च मत्स्यान् जाले बद्ध्वा नेष्यन्ति।'' एतच्चिन्तयित्वा अनागतविधाता अन्यज्जलाशयम् अगच्छत्। एतज्ज्ञात्वा प्रत्युत्पन्नमतिः नाम मत्स्यः ''समयानुगुणं कार्यं करोमि'' इति उक्त्वा निश्चिन्तः अभवत्। तृतीयः मत्स्यः यद्भविष्यः अवदत्, ''भगवच्छक्त्या अहं जीवामि। यदि मरणमेव निश्चितं तर्हि जलाशयान्तरेण किं प्रयोजनम्? भाग्यानुसारं यद् भविष्यति तद् भवतु'' इति।



प्रभाते धीवराः जलाशयं गत्वा जालं प्रसार्य मत्स्यान् अगृह्णन्। प्रत्युत्पन्नमतिः मृतः इव अतिष्ठत्। मृतमिव प्रत्युत्पन्नमतिं दृष्ट्वा धीवरः तं जालात् बहिः अकरोत्। प्रत्युत्पन्नमतिः स्वनामानुगुणं मतिप्रयोगेण ततः जले अकूर्दत् जलाशयान्तरे प्राविशच्च। तृतीयः मत्स्यः जाले पतितः धीवरैः कर्तितः मृतश्च अभवत्। तच्चोक्तम्—

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति।।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| मत्स्याः | = | मछलियाँ | जलाशयः | = | तालाब |
| धीवरः | = | मछुआरा | अवलोक्य | = | देखकर |
| नूनम् | = | अवश्य | बद्ध्वा | = | बाँधकर |
| जलाशयान्तरम् | = | दूसरे जलाशय में | अगृह्णन् | = | पकड़ लिए |
| सुखमेधेते | = | (दोनों) सुख से बढ़ रहे हैं | विनश्यति | = | नष्ट होता है। |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

(क) मत्स्याः कुत्र अवसन्?
(ख) धीवराः कदा जलाशयम् अगच्छन्?
(ग) प्रत्युत्पन्नमतिः कः इव अतिष्ठत्?
(घ) तृतीयः मत्स्यः कुत्र पतितः?
(ङ) अनागतविधाता कुत्र अगच्छत्?

**2. एकवाक्येन उत्तरं लिखत–**

(क) मत्स्यानां नामानि कानि?

(ख) प्रत्युत्पन्नमतिः किमुक्त्वा निश्चिन्तः अभवत्?

(ग) प्रभाते धीवराः किम् अकुर्वन्?

(घ) अनागतविधाता किम् अवदत्?

(ङ) प्रत्युत्पन्नमतिः स्वनामानुगुणं किम् अकरोत्?

**3. रेखाङ्कितपदम् आश्रित्य प्रश्ननिर्माणम् कुरुत–**

(क) मत्स्याः <u>जलाशये</u> अवसन्।

(ख) धीवराः <u>जलाशयम्</u> अवलोकितवन्तः।

(ग) मृतं प्रत्युत्पन्नमतिं धीवरः <u>जालात्</u> बहिः अकरोत्।

(घ) कस्मिंश्चित् जलाशये <u>त्रयः</u> मत्स्याः अवसन्।

(ङ) धीवराः मत्स्यान् <u>जाले</u> बद्ध्वा नेष्यन्ति।

**4. पदच्छेदं कुरुत–**

| | सन्धियुक्तपदम् | पूर्वपदम् | | परपदम् |
|---|---|---|---|---|
| यथा- | एतच्चिन्तयित्वा | एतत् | + | चिन्तयित्वा |
| (क) | अन्यज्जलाशयं | ............... | + | ............... |
| (ख) | एतज्ज्ञात्वा | ............... | + | ............... |
| (ग) | निश्चिन्तः | ............... | + | ............... |
| (घ) | भगवच्छक्त्या | ............... | + | ............... |
| (ङ) | तच्चोक्तम् | ............... | + | ............... |
| (च) | निश्चयः | ............... | + | ............... |
| (छ) | सच्चरित्रः | ............... | + | ............... |
| (ज) | सज्जनः | ............... | + | ............... |
| (झ) | दुश्चरित्रः | ............... | + | ............... |
| (ञ) | तपश्चर्या | ............... | + | ............... |

**5. लकारपरिवर्तनं कुरुत –**

| | लङ्लकार: | | लट्लकार: |
|---|---|---|---|
| यथा– | अवसन् | → | वसन्ति |
| | अवसत् | ← | वसति |
| (क) | अवदन् | → | ................ |
| (ख) | अगच्छन् | → | ................ |
| (ग) | ................ | ← | कथयति |
| (घ) | ................ | ← | गच्छति |
| (ङ) | अभवत् | → | ................ |
| (च) | अगृह्णन् | → | ................ |
| (छ) | अतिष्ठत् | → | ................ |
| (ज) | ................ | ← | प्रविशति |
| (झ) | ................ | ← | पठति |
| (ञ) | ................ | ← | पिबन्ति |

**6. क्रमेण वाक्यानि लिखित्वा कथां लिखत–**

(क) द्वितीयमत्स्यः प्रत्युत्पन्नमतिः "समयानुगुणं कार्यं करोमि" इति निश्चिन्तः अभवत्।

(ख) तृतीयः मत्स्यः जाले पतितः धीवरैः कर्तितः मृतश्च।

(ग) प्रभाते धीवराः जलाशयं गत्वा जालं प्रसार्य मत्स्यान् अगृह्णन्।

(घ) प्रत्युत्पन्नमतिः मृतः इव अतिष्ठत्।

(ङ) वेलाग्रामस्य जलाशये त्रयः मत्स्याः अवसन्।

(च) एकदा धीवराणां वार्तालापं श्रुत्वा जीवनरक्षणाय अनागतविधाता अन्यज्जलाशयम् अगच्छत्।

(छ) तृतीयमस्त्यः यद्भविष्यः अचिन्तयत् ''जलाशयान्तरेण किं प्रयोजनम्।''

(ज) प्रत्युत्पन्नमतिः जले अकूर्दत् जलाशयान्तरे प्राविशच्च।

**7. प्रदत्तैः अव्ययैः वाक्यनिर्माणं कुरुत–**

| | | | | |
|---|---|---|---|---|
| श्वः, | एव, | इति, | अत्र, | बहिः |
| यदि-तर्हि, | नूनं, | प्रातः | अपि | |

**योग्यताविस्तारः –**

- अध्यापकसाहाय्येन पाठ्यपुस्तकात् श्चुत्वसन्धेः उदाहरणानि चिनुत।
- 'हितोपदेशः' इत्यस्मिन् ग्रन्थे बहवः कथाः सन्ति। यथारुचिं पठत।

*विजयी भवति लोकेऽस्मिन् प्रत्युपन्नमतिः सदा।*